त्रैमासिकी / सप्टम्बर् २०२४

# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥



# अनुक्रमणिका


| | |
|---|---|
| गुरूपदेशः | १ |
| निवेदनम् | १ |
| चिन्तनम् | ३ |
| सुभाषितम् | ४ |
| पक्षिमित्राः भवाम । | ५ |
| हे गुरुवर ! | ७ |
| हिन्दुस्तानीसङ्गीतरत्नपदवी विभूषणम् | ८ |
| कृष्णनीतिः | ९ |
| बालरञ्जनी | |
| कार्यनिष्ठायाः महत्त्वम् | १० |
| शब्दपटः | ११ |
| रुचिरा | १२ |
| तस्मै पाणिनये नमः | १३ |
| हास्यकणिका | १४ |
| अकल्पितम् | १५ |
| न्यायः | १६ |
| कैवल्योपनिषदि केचन श्लोकाः | १७ |
| योगविषये किञ्चित् ... | १८ |
| उत्तराणि | १८ |

## ॥ गुरूपदेशः ॥



**दशमगुरु-परमपूज्य-**
**श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।**

ये आध्यात्मिकमार्गे उन्नतिं प्राप्तुमिच्छन्ति , तेषां कृते गुरोः मार्गदर्शनम् अनिवार्यम् । गुरोः प्रमुखहेतुः अस्ति भक्तस्य रक्षणं तथा प्रतिशिष्यस्य योग्यता-प्रकृत्यानुसारम् उचितमार्गं प्रति प्रचोदनं च ।



**एकादशगुरु-परमपूज्य-**
**श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।**

यथा यथा विवेकपूर्ण-चिन्तनं वैराग्यं जनयति तथा साधकस्य विशेषरागः इत्युक्ते भक्तिः - दिव्यत्वं प्रति प्रीतिः अपि वर्धते । एतत् पूर्वजन्मनां पुण्यसञ्चितात् सत्सङ्गादेव सम्भवते । अतः सत्सङ्गः अतीव महत्त्वपूर्णः अस्ति ।

गुरूपदेशानुवादः - अर्चना काप्राडक , चेन्नई

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः । ॐ श्रीभवानीशङ्कराय नमः । ॐ श्रीमात्रे नमः ।

**कृष्णद्वैपायनं व्यासं सर्वलोकहिते रतम् ।**

**वेदाब्जभास्करं वन्दे शमादिनिलयं मुनिम् ॥**

आषाढमासस्य पूर्णिमा गुरुपूर्णिमा  तथा व्यासपूर्णिमा इति सम्बुध्यते ।  समस्तगुरून् प्रति कृतज्ञतां प्रकटीकर्तुं तथा व्यासमहर्षेः सम्मानार्थम् आचर्यते अयं शुभदिनः।

व्यासः सत्यवती-महर्षिपराशरयोः पुत्रः। कृष्णवर्णीयः तथा द्वीपे जातः अतः कृष्णद्वैपायननाम्ना अपि प्रख्यातः। वाङ्मयद्वारा वैदिकधर्मज्योतेः प्रज्वालयिता महर्षिव्यासः भारतीयसंस्कृतेः शिरोमणिः । सप्तचिरञ्जीविषु एकः अयं मानवजनहितार्थम्  अवतरितः प्रचण्डगुरुशक्तेः प्रादुर्भावः ।

वेदव्यासकृतसाहित्यं भारतीयसंस्कृतेः मेरुदण्डः । व्यस्यति वेदान् इति व्यासः।

पूर्वविद्यमान-एकराशिवेदः मानवानां कृते अध्ययनार्थं दुष्करः भवति इति समीक्ष्य भगवता व्यासेन वेदाध्ययनं सुलभीकर्तुं तं विषयानुसारं चतुर्षु भागेषु सङ्कलीकृत्य न केवलं वेदानां संरक्षणं सुनिश्चितम् अपि तु वेदेषु जनानां निष्ठा सुदृढीकृता।

महर्षिव्यासः अष्टादशपुराणानाम् आद्यकर्ता । समाजे यजनसम्प्रदायस्य अपेक्षया उपासनासम्प्रदायः अधिकांशेन प्रचलति इति निरीक्ष्य व्यासेन विविधविचित्रकथाभिः समलङ्कृत्य छन्दोबद्ध-पुराणानि सुविरचय्य जनानाम् अध्यात्मविषये आसक्तिः संवर्धिता । श्रीमद्भागवतं भगवता व्यासेन रचितं प्रथिततमं पुराणम् । भारतीयसंस्कृतेः सभ्यतायाः च यथायथम् अवगमाय पुराणानां नितरां महत्त्वं वर्तते ।

श्रुतीनां तात्पर्यं सङ्क्षिप्तरूपेण बोधयितुं भगवता व्यासेन ब्रह्मसूत्राणि सुविरचितानि । अलौकिकमहाभारतग्रन्थस्य महर्षिव्यासः एव रचयिता । महाभारते भरतवंशस्य समुद्धरणे , पाण्डवानाम् आधारः सम्भूय पदेपदे तेषां मार्गदर्शने इत्यादिषु महर्षिव्यासस्य अपरोक्षसम्बन्धः वर्तते ।

वेदव्यासेन न केवलं प्रचुरमात्रायां वैदिकसाहित्यं निर्मितम् अपि तु समाजस्य , संस्कृतेः , व्यक्तेः च उन्नयनं साधयितुं तेन महत्तरं योगदानं कृतम् अस्ति ।

अस्मिन् वर्षे गुरुपूर्णिमायाः शुभदिने मङ्गळूरुनगरस्थिते श्रीचित्रापुरमठे अस्माकं परमपूज्यगुरुवर्याणां चातुर्मासव्रतं समारब्धम् । गुरुपूर्णिमायां मठस्य पवित्रवातावरणे परमपूज्य-श्रीमत्-वामनाश्रमस्वामिनां समाधि-सान्निध्ये गुरुवर्याणां करकमलाभ्यां सुसम्पन्नं व्यासपूजनं तु दिव्यतायाः एकः विलक्षणः अनुभवः।

चातुर्मासे प्रतिदिनं गुरुवर्याणां दर्शनं , तेषां दिव्यवाण्यां प्रचलत् पूजनं , वैदिकमन्त्रघोषश्रवणं , प्रतिसप्ताहं स्वाध्यायः , नानाविधसांस्कृतिककार्यक्रमाः मनसि नितरां प्रसन्नताम् अजनयन् । वयम् अधिकाधिकसाधनायां प्रवृत्ताः सम्भूय नितान्त-धन्यताम् अनुभूतवन्तः ।

सद्यः एव भाद्रपद-शुक्लपक्षस्य पूर्णिमायां गङ्गापूजनेन , सीमोल्लङ्घनेन तथा दिग्विजययात्रया अस्माकं परमपूज्यगुरुवर्याणां चातुर्मासव्रतस्य समापनं विजृम्भणेन सम्पन्नम् । सन्तृप्तमनसा अस्माभिः परमपूज्यगुरुवर्यान् प्रति मनःपूर्वकं कृतज्ञता प्रकटिता।

**तव पादाम्बुजे नित्यं निश्चला भक्तिरस्तु मे ।**

इति सम्प्रार्थ्य परमपूज्यगुरुवर्यान् हृत्पूर्वकं , सादरं प्रणम्य इदं पत्रिकाकुसुमं सहर्षं , सविनयं तेषां चरणकमलयोः समर्पयामः।

**सम्पादिका**

## चिन्तनम्

– सुमन नागरकट्टी, पुणे

गतडिसेम्बरमासे गीर्वाणप्रतिष्ठया आयोजिते चिन्तने ' श्रवणं तथा तस्य साधनायां महत्त्वम् ' इति विषयम् अधिकृत्य बहवः साधकाः स्वमतान् प्रकटितवन्तः । अस्य चिन्तनस्य सारांशः अधः दीयते।

**श्रवणम् इत्युक्ते किम् ?**

अवधानेन यत् श्रुतं तत् श्रवणम् । अनवधानेन यत् श्रुतं तत् केवलम् आकर्णनम् ।

**किमर्थं श्रवणम् ?**

श्रवणेन ज्ञानम् । ज्ञानादेव तु कैवल्यम् ।

जीवनस्य परमलक्ष्यम् अस्ति मोक्षप्राप्तिः । तस्य कृते ज्ञानम् आवश्यकम् । ज्ञानप्राप्त्यर्थं श्रवणम् अनिवार्यम् । ज्ञानवर्धकात्मशान्तिपोषक-श्रवणेन चित्तशान्तिं चित्तशुद्धिञ्च लब्धुं शक्नुमः।

**ज्ञानं कथं प्राप्नुमः ?**

यद्यपि पठनेन वा अनुभवेन ज्ञानप्राप्तिः शक्या तथापि गुरुमुखात् प्राप्तं ज्ञानम् अनुभवयुक्तम् अतुलनीयञ्च। अतः अमूल्यमेव । गुरुमुखात् विवरणं श्रुत्वा एव अज्ञानस्य संशयस्य च निरसनं भवति । प्रथमं श्रवणं तदनन्तरं ज्ञानसंवर्धनार्थे स्वाध्यायः पठनं मननं चिन्तनम् अपि आवश्यकम् ।

**श्रवणस्य कृते किम् आवश्यकम् ?**

श्रवणस्य कृते शुश्रूषा अर्थात् श्रोतुं तीव्रा इच्छा आवश्यकी । मनसि विनम्रता श्रद्धा च आवश्यकी । वक्तुः विषये आदरः आवश्यकः ।

**श्रवणं कथं भवेत् ?**

श्रवणे एकाग्रता भवेत् । उत्तमश्रवणेन चित्तं समाहितं भवेत् । केवलमन्तर्जालद्वारा विमर्शान् प्रवचनानि च श्रुत्वा यथार्थं शङ्कानिरसनं भवितुं न शक्यते । मनसि अन्यविचाराणां कोलाहलः मा भवेत् । यद्यपि नैकानि अन्यकार्याणि सन्ति चेत् तथापि श्रवणविषयस्य प्राधान्यं भवेत् ।

**वक्ता कीदृशः भवेत् ?**

वक्ता ज्ञानी आदरणीयः अनुभवी च भवेत् । विवेचनं क्लिष्टं न भवेत् । तस्य भाषाशैली सरला श्रोतॄणां परिचितशब्दैः युक्ता च भवेत् । श्रोतॄणां स्तरे आगत्य वक्ता वदति चेत् आकलनं सुलभं भवति । विषयान्तरं भूत्वा अपि श्रोता भ्रमितः भवितुं शक्यते अतः विषये सुसूत्रता आवश्यकी । तदैव प्रारम्भतः अन्तपर्यन्तं श्रोतॄणां मनसि तस्मिन् विषये रुचिः भविष्यति ।

रामायणस्य किष्किन्धा-काण्डे हनुमतः वक्तव्यस्य अतीव सुन्दरं वर्णनम् अस्ति ।

**अविस्तरमसन्दिग्धम् अविलम्बितमद्रुतम् ।**
**उरःस्थं कण्ठगं वाक्यं वर्तते मध्यमे स्वरे ॥**
**संस्कारक्रमसम्पन्नाम् अद्रुतामविलम्बिताम् ।**
**उच्चारयति कल्याणीं वाचं हृदयहारिणीम् ॥**

**श्रवणे कीदृशी बाधा भवितुं शक्यते ?**

बाह्यबाधाः –

यदा वक्तुः भाषणं श्रोतृभिः सम्यक् श्रोतुं न शक्यते तदा तेषां ध्यानं विचलितं भवितुं शक्यते । अतः ध्वनिक्षेपणं सुष्ठु भवेत् । बहिः वाहनानां कोलाहलं वा अतिवृष्टिः भवति तर्हि श्रवणे बाधा भवति । श्रोतृणां मध्ये परस्परं जल्पनमपि बाधा एव ।

आन्तरिकबाधाः –

श्रवणार्थे चित्तशान्तिः आवश्यकी । श्रोतुः मनसि विचाराणां कोलाहलम् अस्ति अथवा तस्य स्वास्थ्यं सम्यक् नास्ति चेदपि श्रवणे एकाग्रता शक्या न भवति । मनः अहङ्काररहितं भवेत् अन्यथा श्रवणं केवलम् आकर्णनं भवितुं शक्यते ।

**साधनायां श्रवणस्य किं प्रयोजनम् ?**

साधना कथं भवेत् इति गुरुमुखात् श्रुत्वा तस्य उचितपालनम् आचरणं भवति चेत् साधनापथि मार्गक्रमणं सुलभं भवति । अस्य कृते गुरुवचनेषु सम्पूर्णा श्रद्धा अनिवार्या । गुरुः भवरोगवैद्यः । सः प्रत्येकशिष्यस्य पूर्वकर्माणि तथा तस्य भवितव्यं, तस्य साधनाक्षमतां च स्पष्टतया जानाति । अतः सः प्रत्येकशिष्यस्य कृते यत् योग्यं तदेव उपदिशति ।

गुरोः प्राप्तः जपः नियमितरूपेण कर्तव्यः। यदि जपं , वारंवारं गुरूपदेशस्य श्रवणं , तस्य मनन-निदिध्यास-अनुसरणं तथा सत्सङ्गविमर्शादिसाधनायाः नियमितपालनं कुर्मः तर्हि चित्तशान्तिं ज्ञानं च प्राप्नुमः।

## सुभाषितम्

**– हेमा कोठेकर , मुम्बई**

**वर्तमानं निरीक्ष्यैव तं जनं नोपहासयेत् ।**
**कालक्रमेण चाङ्गारो हीरकं जायते ध्रुवम् ॥**

**भावार्थः –**

कस्यचित् व्यक्तेः वर्तमानस्थितिं दृष्ट्वा तस्य उपहासः कदापि न कर्तव्यः यतः कालस्य महती शक्तिः अस्ति । यतः सामान्यः अङ्गारपिण्डः अपि गच्छता कालेन मौल्यवान् हीरकमणिः भवति ।

कालचक्रस्य महिमा कोऽपि जानाति वा? कुत्र कृष्णवर्णीयः अङ्गारः कुत्र हीरकः च । सर्वसामान्यः क्षुद्रः आकारहीनः अङ्गारः कालान्तरेण अमूल्यं हीरकं भवति । श्रीदेव्याः मुकुटे विराजमानः भवति । कालस्य गतिविधिः खलु अनाकलनीया एव । कालाय तस्मै नमः ।

# पक्षिमित्राः भवाम ।

**– शिल्पा मुद्रूर, मुम्बई**



'अम्ब, एतां चित्रग्राहिणीं मम स्यूते स्थापयानि वा ?' इति प्रवासार्थं सिद्धतां कुर्वती मम पुत्री पृष्टवती । 'अथ किम् ! तत्र गत्वा अपि त्वमेव चित्राणि गृहाण' इति मया सस्मितम् उक्तम् । 'धन्यवादाः अम्ब !' इति सा मां सस्नेहम् आलिङ्ग्य उक्तवती । एकादश-वर्षीया मम पुत्री पक्षिनिरीक्षणाय सर्वदा उत्सुका भवति स्म । बाल्याद् एव सा निसर्ग-भ्रमणार्थं गन्तुं प्रीयते स्म । पर्वतारोहणं वा सुदूरं पद्भ्यां गमनं वा भवतु, सा विना क्लेशं निवेदयन्ती अस्माभिः सह आगच्छति स्म । तस्याः रुचिं ज्ञात्वा विविधपर्यटनानां स्मरणानि च भवेयुः इत्यर्थं वयं तस्याः कृते चित्रग्राहिणीं क्रीतवन्तः। चित्रग्राहिण्याः क्रयणानान्तरम् एषा अस्माकं प्रथमा यात्रा आसीत् ।

प्रवास-समये सा मां पृष्टवती 'कुत्र अस्ति अस्माकं गन्तव्य-स्थानम् अम्ब ?' 'पुण्यनगरी-अहमद्नगर-महामार्गस्य समीपे 'मोराची चिंचोळी' नामकः ग्रामः अस्ति । मुम्बापुरीतः प्रायः १९० किलोमीटरमिते अन्तरे स्थितं मयूराणां दर्शनार्थं प्रसिद्धं पर्यटन-स्थलं तत् ' इति मया कथितम् । 'तत्र एकस्य कृषकस्य गृहे निवास-व्यवस्था अस्ति । तत्र वयं बहवः मयूर-पक्षिणः निकटतः द्रष्टुं शक्नुमः ।'

'कियत् रोचकम् !' मम पुत्र्याः स्वरे हर्षः सुव्यक्तः आसीत् । 'किं तेन कृषकेण बहवः गृहमयूराः पालिताः सन्ति ?' 'न वत्से । वन्यमयूराः आहारार्थं तस्य गृहम् आगच्छन्ति ।' मम वचनानि श्रुत्वा सा ततोऽपि आनन्दिता अभवत् । 'अहं मम नूतन-चित्रग्राहिण्या बहूनि चित्राणि ग्रहीष्यामि । मयूरः सर्वखगेषु सुन्दरतमः इति मन्यते । सः भारतस्य राष्ट्रीय-पक्षी खलु । ... परन्तु अम्ब, मयूरः एव सुन्दरतमः किमर्थम् ? अन्ये अपि विविधवर्णीयाः शोभनाः खगाः सन्ति न वा ?' 'सत्यम् ! तत् तु वयं मयूरस्य प्रत्यक्षदर्शनेन एव जानीयुः इति मन्ये' अहं हसित्वा उक्तवती ।

'त्वं मयूरस्य विषये इतोऽपि किं जानासि प्रिये ?' इति मम पतिः तां पृष्टवान् । सा उत्साहेन कथितवती – 'मयूरः कुक्कुटवर्गीयः पक्षी । विश्वे मयूरस्य त्रयः प्रकाराः सन्ति । भारतीयः नीलमयूरः, दक्षिणपूर्व-एशियायां दृश्यमानः हरितः जावा-मयूरः, आफ्रिकादेशस्य कोङ्गो-मयूरः च । मयूरस्य दीर्घं पुच्छं वर्तते यस्मिन् शोभनानि पिच्छानि सन्ति । किन्तु मयूरी तादृशी सुन्दरी नास्ति । तस्याः दीर्घबर्हः न भवति ।'

'साधु वत्से ! त्वं बहुविषयान् जानासि ।' जनकस्य प्रशंसया प्रेरिता सा अग्रे कथितवती – 'श्रीकृष्णः स्वमुकुटे मयूरपिच्छं धारयति । मयूरः कार्तिकेयस्य वाहनम् । हिन्दुजनाः तं दिव्यखगं मन्यन्ते । केचन लक्ष्मीदेवीम् आह्वयितुं स्वगृहे मयूरपिच्छानि स्थापयन्ति ।' तदा मया उक्तम्, 'जानासि वा वत्से यत् मयूरः तस्य सुन्दरान् पक्षान् कथं प्राप्तवान् ? तद्विषये एका आख्यायिका अस्ति । एकदा देवराजः इन्द्रः युद्धे रावणं जेतुम् असमर्थः जातः । तदा इन्द्रस्य पुरतः स्थित्वा मयूरः स्वस्य पुच्छम् उद्घाट्य आश्रयं निर्मितवान् यस्मात् इन्द्रः युद्धं कर्तुं रावणं जेतुं च अशक्नोत् । तेन प्रसन्नः इन्द्रः मयूरपिच्छानि इन्द्रचापस्य विविधवर्णैः वर्णितवान् तथा च सर्पेभ्यः रक्षणस्य आशीर्वादं दत्तवान् । ततः परं मयूरः इन्द्रेण सह सम्बद्धः अस्ति ।'

'अहो, पूर्वं न ज्ञाता मया एषा कथा' मम पुत्री विस्मयेन उक्तवती । 'इन्द्रः तु पर्जन्यस्य देवता । अत एव नीलमेघान् दृष्ट्वा मयूरः स्वबर्हं प्रसार्य नृत्यति स्यात् ।' तस्याः एषा कल्पना सर्वेभ्यः अरोचत ।

मया उक्तम्, 'केनचित् सुभाषितकारेण मयूरमेघयोः मित्रता कथं वर्णितास्ति इति शृणु' –

**गिरौ मयूरा गगने पयोदा लक्षान्तरेऽर्कश्च जलेषु पद्मम् ।**

**इन्दुर्द्विलक्षं कुमुदस्य बन्धुः यो यस्य मित्रं नहि तस्य दूरम् ॥**

'पर्वते स्थिताः मयूराः आकाशे स्थितानां मेघानां मित्राणि । तथैव कमलस्य मित्रता दूरस्थितेन सूर्येण, कुमुदस्य च चन्द्रेण सह । अतः मित्रता प्रीतिम् आश्रयति न तु भौतिक-अन्तरम् इति अभिप्रायः ।' सुभाषितस्य स्पष्टीकरणेन अतीव सन्तुष्टा मम पुत्री उक्तवती, 'अम्ब, अहमपि संस्कृतं पठितुम् इच्छामि ।' तदा मम पतिः उक्तवान्, 'अवश्यं पठतु । संस्कृतभाषायां प्रावीण्यं प्राप्नोतु । परम् अधुना वाहनात् अवतराम वा ?'

काव्यशास्त्रविनोदेन समयं यापयन्तः वयं कदा गन्तव्यस्थानं प्राप्तवन्तः इति न ज्ञातमेव । यस्य कृषकस्य गृहे अस्माकं निवास-भोजनादि-व्यवस्था जाता सः अस्मान् अगदत् यत् मयूराः समीपस्थे वनक्षेत्रे निवसन्ति । सायं ५ वादनात् अनन्तरं ते धान्यं खादितुम् आगच्छन्ति । मध्याह्न-समयः आसीत् । वयं रुचिकरं महाराष्ट्रीय-भोजनं खादित्वा विश्रामं कृतवन्तः । कथायोगे सः कृषकः कथितवान् यत् तस्मिन् लघुग्रामे कृषिक्षेत्राणि एव सन्ति । मयूराणां संरक्षणं तत्र कुलपरम्परागतम् । अतः वन्यमयूराणां सङ्ख्या ग्रामवासिनां सङ्ख्यायाः अपेक्षया अधिका अस्ति । सः ग्रामः बहवः छायाप्रदैः चिञ्चावृक्षैः परिभूषितः । तस्मात् **मोराची चिंचोळी** इति तस्य नामधेयं सुष्ठु एव । अधुना सर्वकारेणापि तत्र पर्यटन-प्रचारस्य प्रयासाः कृताः सन्ति । बहवः कृषकाः गृहावासं निर्माय पर्यटनस्य विज्ञापनं कुर्वन्ति । सप्ताहान्ते पक्षिप्रेमिणां तथा नगरात् अनतिदूरं गत्वा आनन्दं लब्धुम् इच्छतां जनानां तत्र आगमनेन ते लाभान्विताः भवन्ति ।



भोजनानान्तरं कञ्चित् विश्रामं कृत्वा वयं सायं ५ वादनात् पूर्वं प्राङ्गणे समागताः । कृषकपत्नी गृहस्य पार्श्वे मुक्तभूमौ धान्यानि प्रसारितवती । प्रथमः मयूरीद्वयम् आगतम् । किञ्चित्कालानन्तरम् एकः सुन्दरः मयूरः शनैः शनैः आगत्य धान्यानि खादितुम् आरब्धवान् । वयं दूरादेव दृष्टवन्तः। खलु विस्मयजनकम् आसीत् तत् दृश्यम् । मम पुत्री चित्रग्रहणे व्यस्ता अभवत् । सः मयूरः यथा छायाचित्रस्य कृते एव मस्तकम् उन्नीय नृपः इव स्थितवान् । सुदीप्तनीलः कण्ठः, सुन्दरं नेत्रं, शिरसि चूडा, सुदीर्घः चित्रितः बर्हः, तस्मिन् प्रकाशे स्फुरन्ति पिच्छानि – नयनानन्दकरं सर्वम् । तद्दिने अस्माकं निश्चयः अभवत् यत् मयूरः किमर्थं सुन्दरतमः पक्षी मन्यते ।

तस्यां रात्रौ वयं दीर्घकालं यावत् कृष्णाकाशे असङ्ख्यतारकाः पश्यन्तः उपाविशन् । नगरात् दूरं प्रदूषणरहिते शान्तस्थले मनःशान्तिम् अनुभूतवन्तः ।

अपरस्मिन् दिने प्रातः मयूराणां पुनरागमनं जातम् । तदा समीपस्थे कृषिक्षेत्रे मयूरीणां पङ्क्तिः , पुनश्च त्रयः मयूराः दृष्टाः । मयूरस्य म्यांउ म्यांउ  इति केकारवः मार्जारस्य आहूः इव श्रूयते इति ज्ञात्वा विनोदं कृतवन्तः । ततः वृषभशकटेन भ्रमणं कृतम् । कृष्णपक्षी (Indian Robin), ब्राह्मिनीसारिका (Brahminy Starling), जल्पाकाः (Babblers), सूर्यपक्षी (Sunbird), धूसरकपोतः (Laughing Dove), इत्यादीनाम् अन्यखगानाम् अपि दर्शनं जातम्। ग्रामीण-जीवनस्य तथा पक्षि-निरीक्षणस्य अद्भुत: आनन्द: अनुभूत: । प्रातराश-समये कृषकमहोदयः पर्जन्ये बर्हं प्रसार्य नृत्यतां मयूराणां वर्णनं कुर्वन्नासीत् । तस्य रम्यखगस्य पूर्णवैभवं द्रष्टुम् उत्सुकाः वयं वर्षाकाले पुनरागमनं प्रतिज्ञाय ततः प्रस्थितवन्तः ।





## हे गुरुवर !

**– वृन्दा चन्दावर , मुम्बई**

रूपं तव दिव्यं मनोहरं
हृदये मम त्वमेव नित्यम् ।
उज्जीवयसी मम जीवनं त्वं
जन्मनि जन्मनि भव मम गुरुस्त्वम् ॥१॥

नैव विस्मर मामिति मे याचना
त्वदन्यो न जाने कोऽपि दयाघनः।
तव सान्निध्ये पवित्रचैतन्यस्रोतः ।
नित्यं मम मस्तके भवतु तव हस्तः॥२॥

# हिन्दुस्तानीसङ्गीतरत्नपदवी विभूषणम्

– सुजाता हळदीपुर, मुम्बई


'गोपाला, मोरि करुणा क्यों नहीं आवे!' अत्यन्तकरुणस्वरेण एषः गायकः रुदन् भगवन्तम् आह्वयन् आसीत् । स्वयं भक्तिरसे निमज्जितः सः किन्तु सम्पूर्णश्रोतृवर्गः अपि तेन सह मन्त्रमुग्धः भूत्वा आकण्ठं भक्तिरसपानं कुर्वन् आसीत् ।

एषः न कोऽपि अन्यः किन्तु प्रसिद्धगायकः अब्दुल-करीम-खानः ।

अस्य गायकस्य जन्म नवम्बर मासस्य ११ दिनाङ्के १८७२ तमे वर्षे किराणा नाम्नि उत्तरप्रदेशे स्थिते कस्मिंश्चित् लघुग्रामे अभवत् । जन्मनः सः हिन्दुः आसीत् । अनन्तरं तेन यवनधर्मः स्वीकृतः।

वयसः पञ्चमवर्षतः अस्य गायन-शिक्षणमारब्धम्। खानस्य प्रथमगुरू आस्तां तस्य पिता सुप्रसिद्धः ख्यालगायकः कालेखानः तथा पितृव्यः अब्दुलखानः। वयसः एकादशवर्षे खानः प्रथमवारं कार्यक्रमं प्रस्तुतवान् । अनन्तरं तेन वडोदरानगरे गायकवाडवंशीयानां राजाश्रयः प्राप्तः ।

कालान्तरेण खानः मुम्बईनगर्यां, पुण्यनगर्यां, साताराजनपदे तथैव कर्णाटकराज्ये नैकान् कार्यक्रमान् प्रस्तुतवान् । सः मैसूरुनगरस्य राज्ञाऽपि आमन्त्रितः । तत्र सः सङ्गीतरत्नपदव्या विभूषितः । अत्रान्तरे तेन कर्णाटकसङ्गीतशैलिः



आत्मसात्कृता । कर्णाटकसङ्गीतस्य केचन अंशाः खानेन हिन्दुस्तानीगायनशैल्यां सम्मिश्रिताः ।

एकदा दक्षिणभारतं कार्यक्रमार्थं गमनसमये केनापि कारणेन रेलयानं स्थगितम् । अग्रे पुनर्गमनाय बहुसमयः आसीत् । तदा खानमहोदयः रेलयानात् अवतीर्य अत्रतत्र अटनं कृतवान् । एकस्मिन् निर्जनस्थाने उपविश्य सः गायनम् आरब्धवान् ।

तदा ग्रामीणाः तत्र आगत्य महोदयं प्रार्थितवन्तः "कृपया पुनर्गच्छतु इतः। अत्र उपवेशनं न उचितम् यतः एतत् स्थानं मर्कटानां गणेन व्याप्तम् । अत्रस्थाः वानराः अत्यन्तम् उपद्रविणः भयङ्कराश्च। एतेषां मर्कटानाम् उपद्रवेण त्रस्ताः नैके ग्रामस्थाः

एतत् स्थानं त्यक्तवन्तः । कोऽपि अत्र आगन्तुं धैर्यमपि न करोति। निर्जनमेव जातं एतत् स्थानं तेषां कारणात्।"

अहं मन्ये वानराणाम् एषः अल्पपरिचयः पर्याप्तः। किन्तु तेषां सूचनां दुर्लक्षीकृत्य खानसाहेबः गायने रममाणः अभवत् । किम् आश्चर्यम् ! एकैकं कृत्वा नैके श्रोतारः तत्र उपस्थिताः। सम्यक् ऊहितं भवता । ते सर्वे श्रोतारः न केऽपि अन्ये किन्तु कुप्रसिद्धाः चञ्चलमर्कटाः एव ! स्वशावकैः सह आगत्य निस्तब्धाः सङ्गीतरसपानं कृतवन्तः। यदि शावकैः चेष्टाः कृताः तर्हि तैः चपेटिकाः अपि प्राप्ताः अम्बायाः। गायनं श्रोतुं सर्वे निःशब्दं उपविष्टाः । न केवलं तत् पर्याप्तम् ! यदा गायनं समाप्य खानसाहेबः पुनः रेलस्थानकं गच्छन् आसीत् तदा एतेषां मर्कटानां सेनाऽपि तेन सह तत्र प्राप्तवती । तत् दृश्यं दृष्ट्वा ग्रामीणाः आश्चर्यचकिताः जाताः ।

खानः न केवलं गायने अपितु सारङ्गी-सितार-वीणा तथा तबलावादनेऽपि निष्णातः आसीत् । १९१३ तमे वर्षे तेन आर्यसङ्गीतविद्यालयं प्रस्थापितम् । १९२० तमे वर्षे सः सङ्गीतानुकूल-मीरजनगर्यां स्थायिकः अभवत् । खानस्य गायनवैशिष्ट्यम् आसीत् तस्य भावपूर्णता । सम्पूर्णः श्रोतृवर्गः तस्मिन् भावरङ्गे सम्मोहितः भवति स्म । तेन प्रस्तुता त्यागराजकृतिः ध्वनिमुद्रितास्ति ।

खानसाहेबस्य नैके शिष्याः अत्युच्चप्रसिद्धिं प्राप्तवन्तः । तेषु समाविष्टाः केचन हिराबाई बडोदेकर, बेहरेबुवा, केसरबाई केरकर, रोशन आरा बेगम इत्यादयः ।

२७ अक्टुबर १९३७ तमे दिने पाँण्डिचेरीनगरे कार्यक्रमार्थं गमनसमये खानसाहेबः दिवङ्गतः। किन्तु तस्य सङ्गीतस्य परिमलः अद्यापि सर्वत्र विकीर्णः प्रवर्तते ।

## कृष्णनीतिः

**– पूर्णिमा कोडकणी , कोल्हापूर**



जोबना कुम्टा , पुणे

एकदा श्रीकृष्णः यमुनानद्याः तटे उपविष्टः आसीत् । सः सायङ्काले आरत्याः पश्चात् नद्याः जले प्रवहन्तम् एकैकं तैलदीपं धृत्वा पुनः जले आवल्यां प्रीत्या प्रवाहितं कुर्वन् आसीत् । एतत् दृष्ट्वा यशोदामाता श्रीकृष्णम् अपृच्छत् ,
" वत्स , किं कुर्वन्नसि त्वम् ?"
श्रीकृष्णः प्रत्युवाच ," अम्ब , दीपान् तेषां सम्यक् मार्गं प्रति मार्गदर्शनं करोमि। "
यशोदामाता अवदत् " जले तु सहस्राः दीपाः सन्ति। त्वं कति दीपान् सम्यक् मार्गं प्रति नेष्यसि ? "
श्रीकृष्णः तदा प्रत्युवाच , " अम्ब , अहं केवलं तान् मार्गदर्शनं करोमि ये मम समीपम् आगच्छन्ति । शेषाः दीपाः जले यथा प्रवहितुम् इच्छन्ति तथा प्रवहन्ति । "

बालरञ्जनी

# कार्यनिष्ठायाः महत्त्वम्


**– सुधा कार्नाड , बेङ्गलूरु**

एकस्मिन् ग्रामे एकः रजकः वसति स्म । तस्य आसीत् एकः गर्दभः । प्रतिदिनं गर्दभस्य पृष्ठभागे वस्त्राणां पोटलिकाः स्थापयित्वा रजकः नद्याः तीरं गच्छति स्म। तत्र वस्त्राणि प्रक्षाल्य आतपे शोषयित्वा पुनः गृहम् आगच्छति स्म । यदा कदा नद्याः अन्यस्मिन् तीरे रजकेन कार्यार्थे गन्तव्यम् आसीत् तदा सः तस्य रासभेन सह नदीम् उत्तरति स्म ।

एकदा रजकः लवणस्य स्यूतं गर्दभस्य पृष्ठभागे स्थापयित्वा नदीम् उत्तरन् आसीत् । जले गर्दभस्य पादः स्खलितः। लवणस्यूतः नद्याम् अपतत् । लवणम् उदके गलितम् । किम् आश्चर्यम् ! स्यूतस्य भारः न्यूनः अभवत् ।

गर्दभः मनसि चिन्तितवान् - " ओहो ! यदि अहं प्रतिदिनं नीरे निमज्जामि तर्हि मया भारः न सोढव्यः।" अन्यस्मिन् दिने यदा रजकः तस्य उपरि वस्त्राणां पोटलिकां स्थापितवान् तदा रासभः नद्याः जले उपविष्टवान् । किन्तु भारः तु न्यूनः नाभवत् । तत्स्थाने हन्त ! हन्त ! किं चिन्तितं किन्तु किं जातम् । भारः द्विगुणितः अभवत् ।

" अति चतुरता तु क्लेशाय एव , मया इदानीं प्रभृति आलस्यं न कर्तव्यम् । " इति गर्दभः चिन्तितवान् । तदारभ्य सः प्रतिदिनं निष्ठया स्वस्य कार्यं कृतवान् । भारम् ऊढ्वा रजकस्य साहाय्यं कृतवान् तस्य स्नेहं प्राप्तवान् च । अस्माभिः अपि आलस्यं त्यक्त्वा यानि कार्याणि करणीयानि निष्ठया करणीयानि । तदा एव जीवने साफल्यं प्राप्नुमः।




दया बाळे कोप्पिकर , न्यू जर्सी

बालरञ्जनी

## शब्दपटः

– सुधा कार्नाड , बेङ्गळूरु
– श्रुती बल्जेकर , मुम्बई




### वामतः दक्षिणम्

२ रजकः गर्दभस्य पृष्ठभागे किं स्थापयति स्म?

३ अधिकस्य विपरीतार्थ-शब्दः।

६ जलस्य पर्यायवाची शब्दः ।

७ कः गर्दभं ताडितवान् ?

८ नीरस्य अन्येकः शब्दः।

१० जले पतितस्य वस्त्राणां पोटलिकायाः भारं किमभवत्?

### उपरिष्ठात् अधः

१ नद्याः जले लवणं किमभवत्?

४ रासभस्य पादः कुत्र स्खलितः?

५ गर्दभः किं वहति?

९ स्यूते किम् आसीत्?

उत्तराणि अन्तिमपृष्ठे दत्तानि ।

## रुचिरा



### अनासस्य कायरसः
(Pineapple kayras)

– सुधा त्रिकन्नाड, मुम्बई

**साहित्यम् –**

१) अनासखण्डाः चषकद्वयम्

२) अर्धचमसमितं हरिद्राचूर्णम्

३) चमसद्वयं तिन्त्रिणीरसम्

४) अर्धचषकमितं गुडम्

५) चमसद्वयं तैलम्

६) चमसद्वयमितानि चणकबीजानि, धानकानि, तिलं च

७) चतुर्थांश-चमसमिताः मेथिकाः

८) कणिकायाः एव (a pinch) हिङ्गुः

९) ५-६ शुष्काः मरीचिकाः

१०) चमसमिताः सर्षपाः

११) सप्त-गिरिनिम्ब-पर्णानि

१२) एकचषकमितं घर्षितनारिकेलम्

१३) स्वादानुसारं लवणम्

**कृतिः –**

१) प्रथमम् एकम् अनासं प्रक्षाल्य तक्षणं कृत्वा लघुखण्डेषु कर्तयतु । खण्डाः चषकद्वयपरिमिताः भवेयुः ।

२) चुल्लिकायां पात्रं स्थापयित्वा पक्तुं पर्याप्तं जलं योजयित्वा तस्मिन् अर्धचमसमितं हरिद्राचूर्णं , चमसद्वयं तिन्त्रिणीरसम् , अर्धचषकमितं गुडम् , अनासफलस्य खण्डान् च योजयित्वा सम्यक् पचतु ।

३) अन्यस्मिन् भर्जनपात्रे चमसद्वये तैले एकैकशः चमसद्वयमितानि चणकबीजानि, कृष्णमुद्गान् , धानकानि , तिलं च योजयित्वा भर्जयतु । चतुर्थांश-चमसमितां मेथिकां कणिकायाः (pinch) एव हिङ्गुं , ५ वा ६ शुष्काः मरीचिकाः , कानिचन गिरिनिम्ब-पर्णानि च योजयतु ।

४) यावत् बीजानां वर्णपरिवर्तनं भवति तावत् भर्जयतु । तदनन्तरं चुल्लिकायाः पात्रम् अपाकरोतु ।

५) एकचषकमित-घर्षितनारिकेलेन सह सम्बारान् (भर्जितानि वस्तूनि) मिश्रके चूर्णीकृत्य मिश्रणं सिद्धीकरोतु ।

६) स्वादानुसारं लवणम् अनासस्य खण्डान् व्यञ्जने योजयित्वा मिश्रणं सम्यक् क्वथयतु।

७) व्याघरणपात्रे एकैकं चमसमिते तैले सर्षपाः षट्सप्त-गिरिनिम्ब-पर्णानि च योजयतु । व्याघरणं कृतं चेत् परिवेषणाय व्यञ्जनं सिद्धं भवति।



# तस्मै पाणिनये नमः

**– शुभदा वकनळ्ळी, टोरोन्टो**

शिष्यः देवदत्तः – नमो नमः आचार्याः।

गुरुः – स्वस्तिः अस्तु। यज्ञदत्तः कुत्र अस्ति? अद्य वर्गं कुतः न आगतः ?

देवदत्तः – आचार्याः, यज्ञदत्तः भोजनं पचति गुरुमातुः साहाय्यं च करोति।

गुरुः – अस्तुः , तर्हि वदतु , पचति, करोति इति क्रियापदद्वये धातुः कः?

देवदत्तः – पच् पाके धातुः (to cook), कृ करणे धातुः (to do / to make / to act) च।

गुरुः – एवम्। तर्हि तयोः महर्षिपाणिनिना धातुपाठे उपदिष्टे मूलरूपे के ? प्रकृती के?

देवदत्तः – पच् धातोः मूलप्रकृतिः डुपचँष् पाके, कृ धातोः मूलप्रकृतिः डुकृञ् करणे च इति।

गुरुः – उत्तमम्। तर्हि डुपचँष् इत्यस्मात् पच् धातुः कथं लभ्यते ? डुकृञ् इत्यस्मात् कृ धातुः कथं लभ्यते ?

देवदत्तः – डुपचँष् इत्यस्मात् षकारस्य इत् संज्ञा हलन्त्यम् इति सूत्रेण, चकारोत्तरवर्ती अकारस्य इत् संज्ञा उपदेशेऽजनुनासिक इत् इत्यनेन। तस्य लोपः इत्यनेन द्वयोः इत्-संज्ञयोः लोपः च। डुकृञ् इत्यस्मात् ञकारस्य इत् संज्ञा हलन्त्यम् इति सूत्रेण तस्य लोपः इत्यनेन तदपि अपगच्छति। किन्तु आचार्याः, डुपचँष् डुकृञ् इत्यनयोः डु इत्यस्य का गतिः?

गुरुः – तद् अवगन्तुम् अन्यद् एकं पाणिनीय-सूत्रम् अवगन्तव्यम्। तत् सूत्रमस्ति 'आदिर्ञिटुडवः (१.३.५)' इति।

देवदत्तः – आचार्याः, इत्-संज्ञाविधायकेषु सूत्रेषु अन्यतमं सूत्रं वा? प्रथम-त्रीणि सूत्राणि अस्माभिः पठितानि। तर्हि इदं चतुर्थं सूत्रं किम् ?

गुरुः – आम्। आदिर्ञिटुडवः (१.३.५) इति सूत्रेण धातोः आदौ विद्यमानानाम् 'ञि', 'टु', 'डु' इति वर्णसमूहानाम् इत्संज्ञा विधीयते । अग्रे 'तस्य लोपः' इत्यनेन लोपः अपि भवति। इदं सूत्रम् केवलं धातोः विषये एव प्रवर्तते न तु प्रत्ययानां कृते इति धातव्यः अंशः । अवगतं वा?

देवदत्तः – आम् आचार्याः। तर्हि डुपचँष् डुकृञ् इत्यनयोः धात्वोः 'डु' इति वर्णसमुदायस्य इत् संज्ञा अनेन सूत्रेण भवति इति तु अवगतम्। तादृशाः अन्ये धातवः अपि भवेयुः खलु?

आचार्यः – अवश्यं भवेयुः। डुलभँष् प्राप्तौ (लभ् धातुः to get / obtain, to have / to find), डुभृञ् धारणपोषणयोः (भृ धातुः to wear / to nourish), डुदाञ् दाने (दा धातुः to give / donate), डुक्रीञ् द्रव्यविनिमये (क्री धातुः to buy) इति आहत्य दश (१०) धातवः ड्वितः सन्ति। ड्वित् धातुः नाम यस्मिन् धातौ 'डु' इत्यस्य इत् संज्ञा कृतमस्ति।

देवदत्तः – अपि च 'ञि', 'टु' इत्यनयोः इत् संज्ञायाः कानि उदाहरणानि?

आचार्याः – इदानीं भवान् वदतु। धातुपाठः पठितः किल भवता। सम्यक् स्मृत्वा वदतु।

देवदत्तः – ञिभी भये (भी धातुः to be afraid of), ञिष्वपँ शये (स्वप् धातुः to sleep), ञिमिदाँ स्नेहने (मिद् धातुः to be greasy / to love), ञिफलाँ विशरणे (फल् धातुः to blossom / to bear fruits) इति आहत्य चतुर्दश (१४) धातवः ञीतः सन्ति। ञीत् धातुः नाम यस्मिन धातौ 'ञि' इत्यस्य इत् संज्ञा कृतमस्ति।

टुनदिँ समृद्धौ (नद् धातुः to prosper), टुमस्जोँ शुद्धौ (मज्ज् धातुः to bathe / to submerge), टुयाचृँ याच्ञायाम् (याच् धातुः to beg), टुभ्राजृँ दीप्तौ (भ्राज् धातुः to shine) इति आहत्य द्वादश (१२) धातवः ट्वितः सन्ति। ट्वित् धातुः नाम यस्मिन धातौ 'टु' इत्यस्य इत् संज्ञा कृतमस्ति।

आचार्यः – उत्तमम्। भवान् जिज्ञासुः बालकः अस्ति। जिज्ञासूनां कृते पाणिनियं व्याकरणं तु रुचिकरं सरलम् एव। शुभं भवतु।

## हास्यकणिका

**– दीपा मुर्डेश्वर , पुणे**

पुत्रः – तात, मम प्रगतिपुस्तकं पश्यतु । भवान् प्रसन्नः भविष्यति।

पिता – ( प्रगतिपुस्तकं दृष्ट्वा ) गणितविषये ९० अङ्काः? अशक्यमेव।

(सः किञ्चित् चिन्तयति , क्रोधेन वदति )- अहं जानामि ! त्वं नवसङ्ख्यायाः अग्रे शून्यं योजितवान् ? सत्यं वद , अन्यथा ...

पुत्रः – न, न ...अहं तथा न कृतवान् !

( पिता पुत्रं ताडयति । पुत्रः रुदन् अम्बायाः समीपं गच्छति । )



अम्बा – अरे, किं जातम्? किमर्थं रोदिसि पुत्र ?

पुत्रः – पिता मां ताडितवान् ।

अम्बा – किमर्थम् ?

पुत्रः – पिता वदति अहं मम प्रगतिपुस्तके गणितस्य गुणेषु नवसङ्ख्यायाः अनन्तरं शून्यं योजितवान्। '

अम्बा – सत्यं वा ?

पुत्रः – न , न ! अहं तु शून्यात् पूर्वं नवसङ्ख्यां योजितवान् !

# अकल्पितम्

– **दुर्गा कुम्टा , मुम्बई**

आसीत् एकः वैद्यः। सः तस्य वैद्यकीय-व्यवसायं कस्मिंश्चित् लघुग्रामे करोति स्म। सः आसीत् एकः शासकीयरुग्णालयः एकस्मिन् उपेक्षितग्रामे। तर्हि कथं तत्र आधुनिकसुविधाः अपेक्षितव्याः ? न्यूनतम-मनुष्यबलं तथैव तत्तुल्याः सुविधाः। तथापि सः शल्यविशारदः आनन्देन तत्र कार्यमकरोत् । प्रतिदिनं भिन्नपरिस्थितिः भिन्नमनुभवञ्च।

एकदा यावत् सः रुग्णालयं प्राप्तवान् तदैव कोऽपि कोलाहलः श्रुतः तेन । कोलाहलस्य स्वरेण स्वयमेव सूचितं यत् किमपि विशेषं घटितमासीत् । रुग्णालयकक्षस्य सुसज्जीकरणात् पूर्वमेव जनसम्मर्दः अन्तः प्राप्तोऽपि । अरे अरे अरे, किं पश्यति सः !! जनैः गम्भीररीत्या व्रणिता एका गर्भवती महिला आनीता । तस्याः बृहत् उदरं दृष्ट्वा तस्याः प्रसूतिसमयः अनतिदूरमिति कोऽपि ऊहितुं शक्तवान्। विचित्रपरिस्थितिरेव। महिलायाः बान्धवाः महिलां तथैव तम् अजातगर्भं कथञ्चित् रक्षतु इति प्रार्थितवन्तः। एषः वराकः वैद्यः किं करणीयमिति चिन्तया ग्रस्तः ।

ओहोहो, किमेतत् !! सा महिला अपघातात् विपुलरक्तस्रावेण मण्डिता। कस्मादपि आघातात् महिलायाः उदरे जातः भयङ्करः व्रणः, तस्मात् विदीर्णछिद्रात् अजात-अर्भकस्य कूर्परपर्यन्तं बहिरागतः रक्तलिप्तः कोमलहस्तः! भयङ्करं दृश्यम् !! क्षणमात्रं तस्य हृदयस्पन्दनं स्थगितम् । वैद्यः सन्नपि तस्य कृते अतीव कष्टप्रदः आह्वानास्पदः प्रसङ्गः सः। अहह ! आपात्कालीना परिस्थितिरेव।

तं हस्तं दृष्ट्वा ईदृशीभिः अल्पसुविधाभिः अत्यल्प-मनुष्यबलेन कथं समस्या निवारणीया इति विचारेण तस्य मतिः कुण्ठिता । उदरात् बहिरागतः हस्तः कथं पूर्ववत् उदरे स्थापनीयः? किन्तु द्वयोः सुरक्षा आवश्यकी किल नो चेत् एषः प्रक्षुब्धः सम्मर्दः किं करिष्यति इति चिन्तयित्वा तस्य मस्तकं बधिरं जातम्।

एतत् सर्वं रुग्णालयस्य एकः सहायकः सर्वम् अवलोकयन्नासीत् । वस्तुतः सः तु अशिक्षितः किन्तु बुद्धिमान् कर्तव्यदक्षश्च । किमपि कार्यं निष्ठया यशस्वीरीत्या च सः करोति स्म।

"वैद्यमहोदय, अहं जानामि किं करणीयमिति।" उक्तवान् सः । "महोदय , अहं पात्रे जलं क्वथयितुं स्थापयामि। एकां सूचिकां निर्जन्तुकीकरोमि। तया उष्णसूचिकया अर्भकस्य हस्तं किञ्चित् तुदतु।"

"तेन किं भविष्यति?" अस्तु। अन्यथा शस्त्रक्रियायाः सज्जता अपि नास्ति। "पश्यामः एवं कृत्वा" इति चिन्तयित्वा यथा तेन आदिष्टं तथा वैद्येन कृतम्।

अहो, किम् आश्चर्यम्!! सूचिकायाः तीक्ष्णेन स्पर्शेन अर्भकस्य हस्तः क्षणमात्रे मातुः उदरे अदृश्यः जातः। सर्वं सम्पन्नं किन्तु शस्त्रक्रियया विना-तदपि अत्यल्प-समयात् ! कापि रक्तहानिः अपि न अभवत्।

आवश्यकान् उपचारान् कृत्वा सा महिला सुरक्षिततया गृहं प्रेषिता।

पश्यन्तु , वैद्यः सुविद्यः किन्तु प्रसङ्गे अशिक्षित-सहायकः तस्य मौलिकं साहाय्यमकरोत्।

वस्तुतः सः यदा प्रारम्भे वैद्यस्य सहायकरूपेण आगतः तदा आपक्वः एव। सर्वथा अनिपुणः संस्कारहीनः किन्तु वैद्यमहोदयः तं प्रीत्या क्षान्तिपूर्वकञ्च नैकान् वैद्यकीयदृष्ट्या आवश्यकतन्त्रान् शनैः शनैः प्रपाठितवान् तम् अनभिज्ञं तरुणं निपुणं कृतवान्। तेनापि सर्वं श्रद्धया सङ्गृहीतं भोः।

तयोः परस्पराधीनता नैकेषु प्रसङ्गेषु अप्रतिमं लक्ष्यं लीलया साधितवती ।

( व्हॉट्सॅप-सन्देशाधारितः )

## न्यायः

– **दुर्गा कुम्टा , मुम्बई**

### लौकिकन्यायः

लौकिकन्यायः इत्युक्ते दैनन्दिनजीवने घटितप्रसङ्गानां कृते परिभाषा यया सोदाहरणं प्रसङ्गस्य सरलतया अवगमनं भवति। एतैः दृष्टान्तैः  सामान्यव्यावहारिकपरिस्थितिः अल्पशब्दैः सुस्पष्टा भवति।

### अन्ध-पङ्गु-न्यायः

यदा परस्परसहयोगेन किमपि कार्यं साध्यते तदा अन्ध-पङ्गु-न्यायः उपयुज्यते वा दृश्यते वा । यथा कोऽपि पङ्गुः अन्धस्य स्कन्धमारुह्य तं मार्गमुपदिश्य न केवलं स्वयं गन्तव्यस्थानं प्राप्नोति किन्तु दृष्टिहीनमपि तत्र प्रापयति च। वस्तुतः द्वयोः दोषः वा वैगुण्यम् वा अस्ति एव, केवलं स्वीयप्रयत्नेन लक्ष्यप्राप्तिः तु न शक्या किन्तु दुष्करं कार्यमपि परस्पराधीनताम् अवलम्ब्य लीलया साध्यते।

# कैवल्योपनिषदि केचन श्लोकाः

– **कृष्णानन्द मङ्कीकर, मुम्बई**

पूर्वे संस्करणे अस्माभिः पञ्चदशः श्लोकः दृष्टः। अस्मिन् श्लोके "व्यष्टि" (यत् आङ्ग्लभाषायां microcosm इति ज्ञातम् ) तथा द्वितीये पादे " समष्टि " (macrocosm) इत्येतयोः विचारः प्रतिपादितः । इदानीम् अग्रे गच्छामः ।

षोडशे श्लोके उक्तमस्ति ,

**" यत्परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत् ।**

**सूक्ष्मात् सूक्ष्मतरं नित्यं स त्वमेव त्वमेव तत् ॥१६॥**

पूर्वे श्लोके , प्राणः , मनः , सर्वाणि इन्द्रियाणि तथा च पञ्चमहाभूतान्यपि "एतस्मात्" जायन्ते इति प्रतिपादितम् । इदानीम् उपनिषत्कारः कथयति यत् , इदं यत् महाकारणं यत् " एतस्मात् " इति शब्देन दर्शितं , तत् सूक्ष्मात् सूक्ष्मतरमस्ति । इदं महत् , इदं विश्वस्य आयतनम् । तथा च तत् , अन्यत्किञ्चिन्नास्ति किन्तु " स त्वम् एव " **तथा " त्वमेव तत् " महाकारणं पूर्वतने श्लोके । अत्र " तत्त्वमसि श्वेतकेतो " इति उपनिषद्महावाक्यस्य स्मरणं भवति ।**

अद्यतने वर्षे, शिवसायुज्य-अनुष्ठानान्तर्गत-साधनामूलकं श्रीभवानीभुजङ्गप्रयातस्तोत्रं यत् वयं प्रतिदिनं पठामः , तस्मिन् दशमे श्लोके उक्तम् ,

**" इति श्रीभवानीस्वरूपं तवेदं प्रपञ्चात्परं चातिसूक्ष्मं प्रसन्नम् " ॥१०॥**

तदेवेदं परब्रह्म सूक्ष्मस्वरूपत्त्वात् अग्राह्यम् , अवर्णनीयम् , अप्रमेयम् इति वेदेषु उपनिषत्सु च निर्दिष्टम् । तैत्तिरीये उपनिषदि, वरुणमुनेः पुत्रः भृगुः, (वारुणी इत्यपि ज्ञातः) पितरं प्रति गच्छति । " अधीहि भगवो ब्रह्म " इति पृष्टः वरुणः तं ज्ञापयति –

**"अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति । यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत् प्रयन्त्यभिसंविशन्ति । तद् विजिज्ञासस्व । तद् ब्रह्मेति । "**

केनोपनिषदि , परब्रह्मणः स्वरूपम् एवमुक्तम् –

**श्रोत्रस्य श्रोत्रं, मनसो मनो यद् वाचो ह् वाचः स उ प्राणस्य प्राणः ।**

वयं श्रोत्रेण न श्रृण्मः किल, किमप्यस्ति परतः श्रोत्रेन्द्रियस्य , यत् तस्य आधारः । तथैव मनसः अपि मनः , वाचोऽपि वाचः तथा प्राणस्य अपि प्राणः तदेव ब्रह्म ।

पुनरुक्तमग्रिमायां ऋचि,

**तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ।**

अत्र " **नेदं यदिदमुपासते** " वाक्ये , " **इदम्** " इति ईश्वरस्य सगुणरूपाराधना विषयः । गुरुः शिष्यमादिशति यत् " **मनसः मनो** " इत्यादि तदेव ब्रह्म त्वं विद्धि , इति ।

सर्वासु उपनिषत्सु इदमेव प्रतिपादितम् । इदमेव अद्वैतम् । इदमेव मोक्षकारणं परब्रह्मात्मैक्यं वा जीवशिवयोः तादात्म्यम् । इदमेव अस्माकं गुरुवर्याः प्रत्येकस्मिन् प्रवचने स्वाध्याये च विशदीकुर्वन्ति प्रस्थापयन्ति च ।

अयं कैवल्योपनिषदि उक्तः श्लोकः अत्यन्तः अर्थगर्भितः , पुनः पुनः स्मर्तव्यः मन्तव्यश्च ।

इत्यलमिदानीम् । पुनर्मिलामः ।

शुभं भवतु ।

## योगविषये किञ्चित् ...

**लेखः – मीनाक्षी बलजेकर, ठाणे**
**अनुवादः – वैशाली कोप्पीकर, बेङ्गलूरु**

# शशाङ्कासनम्

### कृतिः

वज्रासने उपवेष्टव्यम् । द्वयोः जानुनोः मध्ये अन्तरं स्यात् । हस्तद्वयम् उन्नीय , उच्छ्वासपूर्वकं कटिम् अवनम्य , हस्तद्वयं तथा शरीरं भूमौ संस्थाप्य चिबुकः/हनुः भूमिं स्पृशेत् एवं स्थापनीयम् ।

एवं स्थितौ सुखेन स्थातव्यं तथा च तस्यामेव स्थितौ यावान् समयः यापयितुं शक्यते तावान् यापयितव्यः। पुनश्च वज्रासनस्थितौ एव भवितव्यम् ।

### लाभाः

ये मानसिकरूपेण त्रस्ताः भवन्ति तेषां मनः शान्तं भवति। तथैव एतदासनं पचनक्रियामपि विशोधयति। कटिवेदना अपि न्यूनीभवति । जङ्घे गुल्फौ सबलं भवतः।



ध्रुव बल्जेकर , मुम्बई

### वर्ज्यम्

येषां जानुवेदना गुल्फवेदना वा भवति वा कटिवेदना अस्ति , तैः एतद् आसनं न करणीयम् । उच्चरक्तदाबः , स्लिप्-डिस्क-समस्या तथा वर्टिगो-समस्या येषां वर्तते तैः अपि एतद् आसनं न करणीयम् ।

## उत्तराणि

**वामतः दक्षिणम्**
२) पोटलिकाः ३) न्यूनम् ६) उदकम् ७) रजकः ८) जलम् १०) द्विगुणम्

**उपरिष्ठात् अधः**
१) गलितम् ४) नद्याम् ५) भारम् ९) लवणम्

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर **मुखपृष्ठछायाचित्रम् –** भरत नागरमट

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**गीर्वाणप्रतिष्ठायाः संस्कृताध्ययनार्थं संस्कृत-सम्भाषणार्थं च जालाधारित-वर्गाः प्रचलन्ति ।**
**पञ्जीकरणाय आवेदन-पत्रस्य सम्पर्क-सूत्रम्**
**https://chitrapurmath.net/site/activities-girvanaprathistha-online-classes**

Scan QR Code
for Enquiry Form